श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ मन्त्रपुष्पम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

**श्रीः**

**श्रीमते रामानुजाय नमः**

**श्रीमते निगमान्तमहादेशिकाय नमः**

# ॥ मन्त्रपुष्पम् ॥

योऽपां पुष्पं वेद।
पुष्पवान् प्रजावान् पशुमान् भवति।
चन्द्रमा वा अपां पुष्पम्।
पुष्पवान् प्रजावान् पशुमान् भवति।
य एवं वेद।
योऽपामायतनं वेद।
आयतनवान् भवति॥

अग्निर्वा अपामायतनम्।
आयतनवान् भवति।
योऽग्नेरायतनं वेद।
आयतनवान् भवति।
आपो वा अग्नेरायतनम्।
आयतनवान् भवति।
य एवं वेद।
योऽपामायतनं वेद।
आयतनवान् भवति॥

वा॒युर्वा अ॒पामा॒यत॑नम्।
आ॒यत॑नवान् भवति।
यो वा॒योरा॒यत॑नं॒ वेद॑।
आ॒यत॑नवान् भवति।
आपो॒ वै वा॒योरा॒यत॑नम्।
आ॒यत॑नवान् भवति।
य ए॒वं वेद॑।
यो॑ऽपामा॒यत॑नं॒ वेद॑।
आ॒यत॑नवान् भवति॥

अ॒सौ वै तप॑न्न॒पामा॒यत॑नम्।
आ॒यत॑नवान् भवति।
यो॑ऽमुष्य॒ तप॑त आ॒यत॑नं॒ वेद॑।
आ॒यत॑नवान् भवति।
आपो॒ वा अ॒मुष्य॒ तप॑त आ॒यत॑नम्।
आ॒यत॑नवान् भवति।
य ए॒वं वेद॑।
यो॑ऽपामा॒यत॑नं॒ वेद॑।
आ॒यत॑नवान् भवति॥

च॒न्द्रमा॒ वा अ॒पामा॒यत॑नम्।
आ॒यत॑नवान् भवति।

यश्च॒न्द्रम॑स आ॒यत॑नं॒ वेद॑।
आ॒यत॑नवान् भवति।
आपो॒ वै च॒न्द्रम॑स आ॒यत॑नम्।
आ॒यत॑नवान् भवति।
य ए॒वं वेद॑।
यो॑ऽपामा॒यत॑नं॒ वेद॑।
आ॒यत॑नवान् भवति॥

नक्ष॑त्राणि॒ वा अ॒पामा॒यत॑नम्।
आ॒यत॑नवान् भवति।
यो नक्ष॑त्राणामा॒यत॑नं॒ वेद॑।
आ॒यत॑नवान् भवति।
आपो॒ वै नक्ष॑त्राणामा॒यत॑नम्।
आ॒यत॑नवान् भवति।
य ए॒वं वेद॑।
यो॑ऽपामा॒यत॑नं॒ वेद॑।
आ॒यत॑नवान् भवति॥

प॒र्जन्यो॒ वा अ॒पामा॒यत॑नम्।
आ॒यत॑नवान् भवति।
यः प॒र्जन्य॑स्या॒यत॑नं॒ वेद॑।
आ॒यत॑नवान् भवति।

आपो॒ वै प॒र्जन्य॑स्या॒ऽऽयत॑नम्।
आ॒यत॑नवान् भवति।
य ए॒वं वेद॑।
यो॑ऽपामा॒यत॑नं॒ वेद॑।
आ॒यत॑नवान् भवति॥

सं॒व॒त्स॒रो वा अ॒पामा॒यत॑नम्।
आ॒यत॑नवान् भवति।
यस्सं॑वत्स॒रस्या॒यत॑नं॒ वेद॑।
आ॒यत॑नवान् भवति।
आपो॒ वै सं॑वत्स॒रस्या॒यत॑नम्।
आ॒यत॑नवान् भवति।
य ए॒वं वेद॑।
यो᳚ऽप्सु नावं॒ प्रति॑ष्ठितां॒ वेद॑।
प्रत्ये॒व ति॑ष्ठति॥

ओं॑ रा॒जा॒धि॒रा॒जाय॑ प्रसह्यसा॒हिने᳚।
नमो॑ व॒यं वै᳚श्रव॒णाय॑ कुर्महे।
स मे॒ कामा॒न्काम॒कामा॑य॒ मह्य᳚म्।
का॒मे॒श्व॒रो वै᳚श्रव॒णो द॑दातु।
कु॒बे॒राय॑ वैश्रव॒णाय॑।
म॒हा॒रा॒जाय॒ नमः॑॥

ओं शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

**॥ इति मन्त्रपुष्पं समाप्तम् ॥**